This Question Paper consists **42** questions and **8** printed pages.
अस्मिन् प्रश्नपत्रे **42** प्रश्नाः एवम् **8** मुद्रित पृष्ठाः सन्ति ।

Roll No.
अनुक्रमाङ्कः

# SANSKRIT
# संस्कृतम्
# (209)

Code No. **64/S/O/S**
कूट सं.

**SET** **A**

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ..........................................................................

Signature of Invigilators 1. ......................................
(निरीक्षकयोः हस्ताक्षरम्)

2. ......................................

---

**सामान्य अनुदेशाः –**

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः ।
2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति । प्रश्नाः क्रमानुसारमेव सन्ति ।
3. वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु किमपि एकम् उत्तरं चित्वा पृथक्रूपेण प्रदत्ते उत्तर–पुस्तिकामध्ये लिखेत् ।
4. वस्तुनिष्ठप्रश्नसहित सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि ।
5. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।
6. स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट (कोड) संख्या **64/S/O/S, Set** **A** अवश्यं लेखनीया ।

downloaded from StudentSuvidha.com



Download all NOTES and PAPERS at StudentSuvidha.com

**SANSKRIT**

**संस्कृतम्**

**(209)**

**समय : होरात्रयम् ]** **[ पूर्णाङ्काः – 100**

---

**निर्देशाः** (1) अस्मिन् प्रश्नपत्रे **द्विचत्वारिंशत्** प्रश्नाः सन्ति ।

(2) प्रत्येकम् प्रश्नस्य समक्षम् अङ्काः सूचिताः ।

(3) **सर्वे** प्रश्नाः अनिवार्याः ।

---

**खण्ड – क**

1. एकदा बोपदेवः परीक्षायां _______ न अभवत् । **1**

(A) प्रविष्टः (B) सफलः

(C) विफलः (D) अनुत्तीर्णः

2. मकरस्य मित्रं प्रतिदिनं कीदृशानि फलानि खादति ? **1**

(A) अम्लानि (B) मधुराणि

(C) तिक्तानि (D) पक्वानि

3. इन्द्रियाणि कदा पीड़ितानि अभवन् ? **1**

(A) चक्षुः निर्गमनकाले (B) श्रोत्र निर्गमनकाले

(C) प्राण निर्गमनकाले (D) मनसः निर्गमनकाले

4. मत्स्यजीविनः कदा मत्स्यसंक्षयं करिष्यन्ति ? **1**

(A) सायंकाले (B) मध्याह्ने

(C) प्रभातसमये (D) अपराह्ने

5. असुराणां शस्त्रेभ्यः भीता सुरेन्द्रवाहिनी _______ अकरोत् । **1**

(A) पलायनम् (B) पराङ्मुखम्

(C) पराश्रयणम् (D) परामर्शम्

downloaded from StudentSuvidha.com



Download all NOTES and PAPERS at StudentSuvidha.com

6. लीलावती भास्कराचार्यस्य ______ आसीत् । 1

(A) पत्नी (B) पुत्री

(C) भगिनी (D) सेविका

7. गुरुगतां विद्यां कः अधिगच्छति ? 1

(A) जिगमिषुः (B) मुमुक्षुः

(C) शुश्रूषुः (D) मुमूर्षुः

8. 'अहमपि मनोयोगेन पठिष्यामि' – अत्र पठिष्यामि इत्यस्मिन् कः लकारः ? 1

(A) लट् (B) लङ्

(C) लृट् (D) लोट्

9. ते मनसा ध्यायन्तः जीवन्ति अत्र 'मनसा' पदस्य मूलशब्दः कः ? 1

(A) मनः (B) मनस्

(C) मानस् (D) मानुष

10. रिक्तस्थाने किं भविष्यति ? 1

"सर्वेन्द्रियाणि संयम्य ______ पतितो जनः ।'

(A) सिंहवत् (B) बकवत्

(C) हंसवत् (D) शशकवत्

11. (i) ऋष्यमूकपर्वते रामः केन सह अमिलत् ?

(ii) तत्र सः कस्य वधाय समयः कृतः ? 1 + 1 = 2

12. (i) शक्रस्य कीर्तिं लक्ष्मीं च असहमानाः के ईर्ष्यालवः जाताः ?

(ii) कर्त्तव्यनिष्ठः जनः जीवने किं प्राप्नोति ? 1 + 1 = 2

13. (i) शक्रस्य असुरसैन्येन सह कुत्र रणः प्रारब्धः ?

(ii) मकरी जंबुफलानि खादित्वा कम् आनेतुं कथयति ? 1 + 1 = 2



Downloaded from StudentSuvidha.com

Download all NOTES and PAPERS at StudentSuvidha.com

14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत – **1 × 3 = 3**

लवः – (सोन्मादम्) आः कथम् अनुकम्पते नाम ? (ससम्भ्रमं विचिन्त्य) भवतु जृम्भकास्त्रेण तावत् सैन्यानि संस्तम्भयामि । (इति नाट्येन मुंचति) ।

सुमन्त्रः – अये ! किमिदानीं सैन्यघोषाः प्रशान्ताः । वत्स, मन्ये कुमारेण जृम्भकास्त्रं प्रयुक्तमिति ।

चन्द्रकेतुः – अत्र कः संदेहः । पश्यतु सैन्यम् चित्रलिखितमिव अस्पन्दम् आस्ते । अतोऽजितवीर्यं जृंभकास्त्रमेवेदम् ।

सुमन्त्रः – कुतः पुनरस्य जृम्भकस्य प्राप्तिः ।

चन्द्रकेतुः – भगवतः प्राचेतसादिति मन्यामहे ।

**प्रश्नाः**

(i) लवः केन सैन्यानि संस्तम्भयति ?

(ii) सैन्यम् किमिव अस्पन्दम् जातम् ?

(iii) जृम्भकास्त्रस्य प्राप्तिः कुतः जाता ?

15. कस्यचिदेकस्य चरित्रचित्रणं पंचवाक्येषु संस्कृतेन कुरुत । **1 × 5 = 5**

कण्वः **अथवा** शकुन्तला

16. प्रश्नान् उत्तरत –

(i) यः क्रोधं वशीकरोति सः कीदृशः नरः ? **1**

(ii) त्रिपथगा नदी का उच्यते ? **1**

17. (i) मरिष्यतः मनुष्यस्य किम् मित्रम् ? **1**

(ii) हलवाहकेषु कृषकेषु कस्य निवासः अस्ति ? **1**

18. आत्मवत् सर्वभूतानि पश्यतोऽस्य पदानुगाः । **1 + 1 = 2**

गुणैः परवशीभूता व्यवर्धन्त सहस्रशः ।।

(i) महात्मनः अनुयायिनः सर्वभूतानि कथं पश्यन्ति ?

(ii) कैः प्रभाविताः सहस्रशः व्यवर्धन्त ?

19. नाप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत् । **1 + 1 = 2**

अमेध्यालिप्तमन्यद्वा लोहितं वा विषाणि वा ।।

(i) कुत्र ष्ठीवनं न समृत्सृजेत् ?

(ii) अमेध्यालिप्तं जलेषु समुत्सर्जनेन जलं कीदृशं भवति ?

20. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत – **1 × 3 = 3**

हिताशीस्यान्मिताशी स्यात् कालभोजी जितेन्द्रियः ।

पश्यन् रोगान् बहून् कष्टान् बुद्धिमान् विषमाशनात् ।।

**प्रश्नाः**

(i) मिताशी इति शब्दस्य कः अर्थः ?

(ii) भोजनं कदा कुर्यात् ?

(iii) विषमभोजनात् किं भवति ?



downloaded from StudentSuvidha.com

Download all NOTES and PAPERS at StudentSuvidha.com

21. निम्नलिखितश्लोकस्य अन्वये रिक्तस्थानपूर्तिं कुरुत – 1 × 3 = 3

छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ।।

**अन्वयः**

वृक्षाः ______ इव स्वयम् ______ तिष्ठन्ति अन्यस्य, छायां कुर्वन्ति फलानि अपि ______ (फलन्ति) ।

22. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत – 1 + 1 = 2

(i) दौवारिकः नम्रीभूय प्रणमति ।

(ii) मया बहुशः परीक्षितः असि ।

23. कः कम् प्रति कथयति ? 1 + 1 = 2

(i) 'सत्यमभिहितं भवता । तदन्यत्र गम्यताम् ।'

(ii) न भवद्भ्यां मन्त्रितम् सम्यक् एतत् ।

24. दुग्धं तक्रं च कदा पिबेत् ? 1 + 1 = 2

25. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत – 1 × 3 = 3

तपः स्वधर्मवर्तित्वं मनसो दमनं दमः ।
क्षमा द्वन्द्वसहिष्णुत्वं ह्रीरकार्यनिवर्तनम् ।।

(i) तपः किम् प्रोक्तम् ?

(ii) मनसः दमनं किं कथ्यते ?

(iii) अकार्यनिवर्तनम् किम् ?

26. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत – 1 × 3 = 3

समानी व आकृतिः समाना हृदयानि वः ।
समानमस्तु वो मनः यथा वः सुसहासति ।।

(i) वः हृदयानि कीदृशानि स्युः ।

(ii) आकृतिः इत्यस्य कः अर्थः ?

(iii) मनः कीदृशम् अस्तु ?

27. कस्यचिदेकस्य पाठस्य सारांशं पंचवाक्येषु लिखत – 1 × 5 = 5

प्राणस्य श्रेष्ठत्वम्

कर्त्तव्यनिष्ठा

त्याज्यम् न धैर्यम्



downloaded from StudentSuvidha.com

Download all NOTES and PAPERS at StudentSuvidha.com

## खण्ड–ख

### (अनुप्रयुक्तव्याकरणम्)

28. अधोलिखितेषु दन्त्यवर्णौ चित्वा लिखत – **1 + 1 = 2**

ख, ट, र, द, उ, ल

29. रेखांकितपदेषु सन्धिच्छेदं कृत्वा सन्धिनाम लिखत – **1 × 3 = 3**

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ।।

30. सन्धिं कुरुत – **1 + 1 = 2**

सर्व + इन्द्रियाणि । तत् + आकर्ण्य ।

31. रेखांकितपदयोः कः मूलशब्दः का च विभक्तिः ? **1 + 1 = 2**

वयम् अत्र प्रतिदिनं घटान् स्थापयामः ।

32. रिक्तस्थानेषु अंकानां स्थाने संख्यावाचकानि पदानि लिखत – **1 × 3 = 3**

(i) ___1___ मत्स्यः तत्र वसति ।

(ii) ___3___ फलानि तत्र सन्ति ।

(iii) ___3___ बालिकाः कक्षायां सन्ति ।

33. रेखाङ्कितपदयोः कः मूलशब्दः का च विभक्तिः ? **1 + 1 = 2**

ते असुराणां विषदग्धेभ्यः शस्त्रेभ्यः भीताः आसन् ।

34. रेखांकितपदयोः कः धातुः कश्च लकारः ? **1 + 1 = 2**

आर्यभटः खगोलज्ञः आसीत् । शिष्याः प्रविशन्ति ।

35. अधोलिखितयोः समस्तपदयोः विग्रहं लिखत – **1 + 1 = 2**

महासत्त्वः । जलाशयनिर्भरम् ।

36. अधोलिखितविग्रहाणां कृते समस्तपदं लिखत – **1 + 1 = 2**

रथम् आरूढः ।
कार्यस्य क्षेत्रे ।



StudentSuvidha.com
downloaded from
Download all NOTES and PAPERS at StudentSuvidha.com

37. रिक्तस्थाने किं पदं भविष्यति – 1 + 1 = 2

(i) गणितविषयान् _______ अनुसंधानं क्रियते। (आ + धृ + ल्यप्)

(ii) रावणेन सीता बलात् _______ । (हृ + क्त)

38. रिक्तस्थानपूर्तिं कुरुत – 1 × 3 = 3

(i) ते _______ विषयान् शीघ्रम् अवगच्छन्ति। (सर्व)

(ii) सः प्रसन्नेन _______ कार्यं करोति। (मनस्)

(iii) मम _______ धनम् नास्ति। (भाग्य)

## खण्ड–ग

## (रचनाकौशलम्)

39. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत – 1 × 5 = 5

हिमालयो नाम पर्वतः भारतदेशस्य उत्तरदिशायां वर्तते। अस्य शिखरभागाः सदैव हिमाच्छादिताः सन्ति। अत एव सः 'हिमस्य आलयः' कथ्यते। सः विश्वस्य समस्तेषु पर्वतेषु उन्नततमः। सः नगाधिराजः इत्यपि ज्ञायते।

पर्वतोऽयं शिवस्य क्रीडास्थली, पार्वत्याः जन्मस्थानम् अपि, किन्नर–गंधर्व–सुरादीनां वसतिः अस्ति। हिमालयस्य शृंगानि अत्युन्नतानि सन्ति। अत एव उत्तरदिशायां भारतस्य प्रहरी इव असौ विद्यते।

**प्रश्नाः**

(i) के हिमाच्छादिताः सन्ति ?

(ii) हिमालयस्य अपरं नाम किम् ?

(iii) हिमालयः केषां वसतिः अस्ति ?

(iv) 'शृंगानि' इति पदस्य विशेषणं किम् ?

(v) 'जन्मस्थलम्' इत्यर्थे अनुच्छेदे कः शब्दः प्रयुक्तः ?

40. अधोलिखितविषयमधिकृत्य मञ्जूषापदसहायतया एकम् अनुच्छेदं लिखत। 1 × 5 = 5

सत्सङ्गतिः

| मञ्जूषा |
|---|
| सतां संगतिः कथ्यते सद्भिः निवसन् नरः सद्गुणी, सत्संगत्या प्राप्नोति यशः शिष्टः विनीतः व्यवहारकुशलः दुर्जनसंगत्या दुश्चरित्रः सतां सह मूर्खः बुद्धिमान् पुष्पैः सह कीटः सतां शिरः आरोहति। |



downloaded from StudentSuvidha.com

Download all NOTES and PAPERS at StudentSuvidha.com

41. भवान् प्रियांशुः । गतसप्ताहे बुधवासरे रात्रौ दूरदर्शने प्रसारितं संस्कृतनाटकं बहु उत्तमम् आसीत् । प्रतिसप्ताहम् एतादृशाः कार्यक्रमाः पुनः पुनः प्रसारिताः भवन्तु इति प्रार्थयन् निदेशकं पत्रमेकं मंजूषाप्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा लिखतु । **1 × 5 = 5**

लक्ष्मणपुरम्

तिथिः

माननीयाः निदेशकमहोदयाः

दूरदर्शनम् नवदेहली

सादरं निवेदयामि यत् गतसप्ताहे बुधवासरे रात्रौ ____(i)____ संस्कृतनाटकम् बहु ____(ii)____ आसीत् । प्रतिसप्ताहम् एतादृशा ____(iii)____ पुनः प्रसारिताः भवन्तु इति ____(iv)____ ____(v)____ ।

भवदीयः

प्रियांशुः

| **मञ्जूषा** |
| --- |
| प्रसारितम्, उत्तमम्, नाटकाः, प्रार्थये, अहम् |

42. अधोलिखितं चित्रं दृष्ट्वा मञ्जूषापदसहायतया पञ्च वाक्यानि संस्कृतेन लिखत – **1 × 5 = 5**



| **मञ्जूषा** |
| --- |
| चित्रे वनम् बहवः तत्र पशवः पक्षिणः वृक्षेषु उपविष्टाः, द्वौ सिंहौ, त्रयः मयूराः, द्वौ अश्वौ, त्रयः वृषभाः एकागौः सवत्सा । |

downloaded from StudentSuvidha.com



Download all NOTES and PAPERS at StudentSuvidha.com